**Sulphur,** *s.* गांधिकः, गंधकः, गंधाश्मन् *m.*, सौगंधिकः. **-ated,-cous,** *a.* गंधकसंपृक्त-युक्त, गंधकगुणविशिष्ट, गंधकगर्भ.

**Sulphuret,** *s.* ( Of iron ) ताप्यं; ( of mercury ) कज्जली.

**Sultry,** *a.* प्रखर, तिग्म, प्रवृद्धताप, अत्युष्ण, निर्वात; 's. season' निदाघः, ग्रीष्मः.

**Sum,** *s.* योगः, संकलनं,संयोजनं (in Math.). **2** साकल्यं, समाहारः, समवायः. **3** सारः, तात्पर्यं, सारांशः. **4** राशिः. **5** संग्रहः, संक्षेपः. **6** ( Of money ) राशिः, धनभागः-अंशः, oft. not ex.; 'spending a large s. of money' भूरिद्रव्यव्ययः; 'small s. of money' अल्पधनं; बहुधनं &c. **7** परा कोटिः, सारः;'s. and substance';*See* **Substance.** **-*v. t.*** संयुज् 10, सं-कल् 10 ( कलयति ). **2** ( up ) संक्षेपेण कथ् 10, समासतो वद् 1 P, ( उक्तं ) उपसं-हृ 1 P. **-Summary,** *a.* संक्षिप्त, सामासिक ( की *f.* ). **2** क्षिप्र, अविलंबित. **-*s.*** संक्षेपः, सारः, संग्रहः. **-ily,** *adv.* संक्षेपतः, संक्षेपेण, समासतः.

**Summer,** *s.* ग्रीष्मः, निदाघः, घर्मः, तपः, उष्णः, उ(ऊ)ष्मागमः, उ( ऊ )ष्मकः, ग्रीष्मसमयः-कालः &c.; 's.-house' केलि or विलास-गृहं or मंदिरं; 's.-house with fountains &c.' जलमंदिरं, धारायंत्रगृहं.

**Summit,** *s.* शिखरः-रं, शृंगं, सानु *m.*, *n.*, चूडा, शिखा, अग्रं, कूटः-टं; 'reclining on the s. of the western mountain' अस्ताचलचूडावलंबिन्. **2** ( fig. ) परा काष्ठा-कोटिः.

**Summon,** *v. t.* आह्वे 1 P, आकृ c., आनी c., आवह् c.; 'to s. up courage'; *See* **Courage. -Summons,** *s.* आह्वानं; 'written s.' आह्वानपत्रं; 'he who disobeys a s.' आहूतोऽनागच्छन् ( V. M. 4 ).

**Summum-bonum,** *s.* निःश्रेयसं, परमार्थः, अपवर्गः.

**Sumpter,-horse,** *s.* स्थू( स्थौ )रिन् *m.*, पृष्ठ्यः.

**Sumptuary,** *a.* व्ययविषयक, व्ययनियमसंबंधिन्.

**Sumptuous,** *a.* महार्ह-र्घ, बहुव्ययसाध्य, महा-बहु-मूल्य. **2** विशिष्ट; 's. feast' भोजनविशेषः. **-ly,** *adv.* अतिव्ययपूर्वं, महाव्ययेन. **-ness,** *s.* महा-अति-व्ययः.

**Sun,** *s.* रविः, सूर्यः, आदित्यः, भानुः, सवितृ अर्कः, भास्करः, दिनकरः, दिवाकरः, मार्तंडः, मरीचिन्, विवस्वत्, मित्रः, खगः, पूषन्, भास्वत्, and comp. of 'Hot' with 'Ray', 'Ray' with सहस्र, पतिः with 'Day'; उष्णरश्मिः, सहस्रकिरणः, सहस्रधामा, दिनपतिः &c. **2** आतपः; 'morning-s.' बालातपः, बालार्कः; 'exposed to the sun' आतपे वृत्तं, आतपायोज्झितं ( धान्यं ); 's.-beam' सूर्यकिरणः, अंशुः; *See* **Ray;** 's.-day' रविवारः-वासरः, भानुवासरः; 's.-dial' सूर्यघटी; 's.-rise' सूर्योदयः, उदयः; 's-set' अस्तमनं, अस्तः, दिनांतः; 'at s.-set' अस्तं गते रवौ; 'at s.-rise'; समुदिते रवौ 'from, s.-stroke' आतपलंघनात् ( *S.* 3 ); 's.-shine' सूर्यातपः, प्रकाशः, सूर्यालोकः. **-ny,** *a.* सौर ( री *f.* ) ( *s.* ) in comp. **2** सूर्यतप्त, आतपव्याप्त, आतपाक्रांत; आतपवत्, सातप.

**Sunder,** *See* **Separate.**

**Sundry,** *a.* बहुविध, नानाविध, विविध, अनेक-नाना in comp.

**Sup,** *v. i.* रात्रौ भुज् 7 A. **-Supper,** *s.* रात्रिभोजनं.

**Super,** A prefix rendered by अति, अधिक, अतिशय in comp.; 's.-abound' अतिबहुलीभू; 's.-abundant' अतिबहुल, उपचित.

**Super-annuated,** *a.* वयोऽधिक, वार्धक्येन कार्याक्षम.

**Superb,** *a.* अतिशोभन; *See* **Magnificent.**

**Supercilious,** *a.* अवलिप्त,अत्युद्धत, अतिदृप्त.

**Supererogatory,** *a.* विध्यतिरिक्त, नियमातिरिक्त. **-Supererogation,** *a.* नियमातिरेकः, अत्याचारः.

**Superficies,** *s.* तलं, पृष्ठं. **-Superficial,** *a.* बाह्य, बहिःस्थ, बहिः-पृष्ठ in comp.; 's. contents' पृष्ठफलं; 's. view' बाह्यालोकः. **2** गाध, पल्लवग्राहिन्, अल्प, असूक्ष्म, अनिपुण, अगाढ; 's. scholar' अल्पज्ञः, चुंबकः. **-ly,** *adv.* बाह्यतः, बहिः.

**Superfine,** अतिसूक्ष्म, सर्वोत्कृष्ट.

**Superfluous,** *a.* अधिक, अतिरिक्त, व्यर्थ, अपेक्षातिरिक्त; oft. ex. by. पुनरुक्त; 'render s.' पुनरुक्ततां नी 1 P, ( इदमुत्पाद्य सरःसलिलं अमृतरसमुत्पादयता पुनरुक्ततामिव नीता स्वसृष्टिः Ka. 124 ); 'when there is clear moonlight, torches are s.' अभिव्यक्तायां चंद्रिकायां किं दीपिकापौनरुक्त्येन ( V. 3 ); आशास्यमन्यत्पुनरुक्तभूतं ( R. v. 34 ). **-ness,-Superfluity,** *s.* आधिक्यं, पुनरुक्तता, अतिरेकः, वैयर्थ्यं.

**Superhuman,** *a.* अ-अति-मानुष ( षी *f.* ), अतिमर्त्य, अपौरुष ( षी *f.* ), मानुषातिग.

**Superincumbent,** *a.* उपरिस्थित, अधिशयान, उपरिवर्तिन्.

**Superinduce,** *v. t.* अध्यारुह् c., अधिनिविश् c.

**Superintend,** *v. t.* पर्यवेक्ष् 1 A, अधि-ष्ठा 1 P, अध्यास् 2 A. **-ence,** *s.* अधिष्ठानं, अवेक्षा, अधिकारः, अध्यक्षता, अवेक्षणं, कार्यदर्शनं. **-ent,** *s.* पर्यवेक्षकः, अधीशः, अध्यक्षः, अधिकारिन् *m.*

Institute of Indology & Tamil Studies Cologne University Germany 9/1/2007